# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-3)(New&Old)** | **प्रश्नपत्रम् – 4 (4)** | गुणाः –70 |
| विषयः – साहित्यम् (नाट्यवर्गः) | **कोड –C.C.5.3.9** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –12/10/2019 | सन्दर्भग्रन्थः – नाट्यदर्पणम् – विवेकौ – १,२ | |

**प्रश्नः- १ (क) अधोलिखितयो: एकस्य सप्रसङ्गं व्याख्या कार्या।** (०५)

(१) उद्धतोदात्त-ललित-शान्ता:धीरविशेषणा।
वर्ण्या:स्वभावाश्चत्वार:नेतृणां मध्यमोत्तमा: ॥

(२) नीरसानुचितं सूच्यं प्रयोज्यं तद्विपर्यय:।
उह्यं तदविनाभूतम् उपेक्ष्यं तु जुगुप्सितम् ॥

**प्रश्नः-१ (ख) नाटकलक्षणं विलिख्य नायकभेदान् यथाग्रन्थं स्पष्टयत।** (१०)

अथवा

**इतिवृत्तस्य लक्षणं लिखित्वा तस्य भेदान्  यथाग्रन्थं स्पष्टयत।**

**प्रश्नः-२ (अ) अधोलिखितयो: एकस्य सप्रसङ्गं व्याख्या कार्या।** (०५)

(१) अभिधात: प्रधानस्य नेतुर्ग्रन्थ्यो न कुत्रचित्।
बन्ध:पलायनं सन्धि:, योज्यो वा फललिप्सया ॥

(२) अङ्कास्यमन्तपात्रेण,छिन्नाङ्कमुखयोजनम्।
वस्तुन: सूचनं चूला,पात्रैर्नैपथ्यसंस्थितै: ॥

**प्रश्नः-२ (ब) नाट्यदर्पणानुसारं पञ्चार्थप्रकृति: सविस्तरं विवेचनीया।** (१०)

अथवा

**नाट्यदर्पणानुसारं पञ्चावस्था प्रतिपादनीया ।**

**प्रश्नः-३ (अ) अधोलिखितयो: एकस्य सप्रसङ्गं व्याख्या कार्या ।** (०५)

(१) संग्रहो रूपमनुमा, प्रार्थनोदाहृति:क्रम:।
उद्वेगो विद्रवश्चेतद्, गुणत:कार्यमष्टकम् ॥

(२) विलासो धूननं रोध:, सान्त्वनं वर्णसंहृति: ।
नर्म नर्मधृतिस्ताप:,स्युरेतानि यथारुचि ॥

**प्रश्न:- ३ (ब) प्रतिमुखसन्धि: सोदाहरणं विवेचनीय: ।** (१०)

अथवा

**गर्भसन्धिं सोदाहरणं विवेच्यताम् ।**

**प्रश्न:- ४ (अ) अधोलिखितयो: एकस्य सप्रसङ्गं व्याख्या कार्या ।** (०५)

(१) चतुरङ्का बहुस्त्रीका नृपेशा स्त्री-महीफला ।
कल्प्यार्था कैशिकी-मुख्या,पूर्वरूपद्वयोत्थिता ॥

(२) अशान्त-हास्य-श्रृङ्गार-विमर्श: ख्यातवस्तुक: ।
रौद्रमुख्यश्चतुरङ्क:, सेन्द्रजाल-रणो डिम: ॥

**प्रश्न:-४ (ब) प्रकरणस्य स्वरूपं सविस्तरं चर्चयन्तु ।** (१०)

अथवा

**नाटिकाया: लक्षणानि सोदाहरणं वर्णयन्तु ।**

**प्रश्न: -५ निम्नलिखितेभ्य: दशप्रश्नानामुत्तराणि एकैकवाक्यै: लिखन्तु ।** (१०)

(१) नाट्यदर्पणस्य कर्तारौ कौ?
(२) ग्रन्थकारानुसारं रुपकाणां कति भेदा: सन्ति ?
(३) प्रवेशकस्य लक्षणं किम् ?
(४) रामचन्द्रगुणचन्द्रौ कस्य शिष्यौ आस्ताम् ?
(५) पताकाया: लक्षणं किम् ?
(६) कार्यस्य लक्षणं किम् ?
(७) निर्वहणसंधे: कति अङ्गानि सन्ति ?
(८) नाटिका कतिविधा ?
(९) नाट्यदर्पणस्य प्रथमविवेकस्य नाम किम् ?
(१०) डिमरूपके कति अङ्का: भवन्ति ?
(११) नाट्यदर्पणस्य द्वितीयविवेके कति कारिका: सन्ति ?
(१२) व्याहारस्य लक्षणं किम् ?
(१३) प्रहसनं कतिविधम् ?
(१४) नाटिकायां कति अङ्का: भवन्ति ?
(१५) विरोधस्य लक्षणं किम् ?